# Rajni Kavacham

# રાજ્ઞીકવચમ્

## Document Information

Text title : Rajni Kavacham

File name : rAjnIkavacham.itx

Category : devii, kavacha, dashamahAvidyA

Location : doc_devii

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale tantre dashavidyArahasye

Latest update : September 29, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 29, 2019

*sanskritdocuments.org*

# રાજ્ઞીકવચમ્

ૐ શ્રીભૈરવ ઉવાચ -
શ્ૃણુ દેવિ પ્રવક્ષ્યામિ રાજ્ઞીકવચમુત્તમમ્ ।
ત્રૈલોક્યવિજયં નામ દિવ્યં ભોગાપવર્ગદમ્ ॥ ૧॥

મૂલમન્ત્રમયં સાધ્યમષ્ટસિદ્ધિપ્રદાયકમ્ ।
સર્વૈશ્વર્યપ્રદં લોકે સર્વાગમવિનિશ્ચિતમ્ ॥ ૨॥

પઠનાદ્ધારણાદ્દેવિ મહાપાતકનાશનમ્ ।
મહોત્પાતપ્રશમનં મૂલવિદ્યામનોહરમ્ ॥ ૩॥

વિરૂપાક્ષઃ શિવો દેવિ વિષ્ણુર્નારાયણો બલી ।
બ્રહ્મા પિતામહો લોકે જિષ્ણુર્ગીર્વાણનાયકઃ ॥ ૪॥

મહોનિધિસ્તથા સૂર્યસ્તારકાધિપતિઃ શશી ।
રત્નાકરશ્ચ જલધિઃ શેષશ્ચાનન્તતાં ગતઃ ॥ ૫॥

શ્રીરાજ્ઞ્યાઃ કવચસ્યાસ્ય પઠનાદ્ધારણાત્સદા ।
બહુનોક્તેન કિં દેવિ કવચસ્યાસ્ય ધારણાત્ ॥ ૬॥

મર્ત્યોપ્યમર્ત્યતાં યાતિ રાજ્ઞીપદમવાપ્નુયાત્ ॥ ૭॥

ઋષિરસ્ય મહાદેવિ બ્રહ્મા છન્દ ઉદાહૃતમ્ ।
ગાયત્રં દેવતા રાજ્ઞી માયા બીજમુદાહૃતમ્ ॥ ૮॥

શરચ્છક્તિઃ કીલકં ચ કામરાજો મહેશ્વરિ ।
ભોગાપવર્ગસિદ્ધ્યર્થે વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૯॥

અસ્ય શ્રીમહારાજ્ઞિકવચમન્ત્રસ્ય, બ્રહ્મા ઋષિઃ, ગાયત્રં છન્દઃ,
શ્રીમહારાજ્ઞી દેવતા, હ્રીં બીજં, સૌઃ શક્તિઃ, ક્લીં કીલકં,
આત્મનો વાઙ્મનઃકાયોપાર્જિતપાપનિવારણાર્થં
મહારાજ્ઞીપ્રીત્યર્થં પાઠે વિનિયોગઃ ॥

ધ્યાનમ્ -

ૐ લક્ષ્મીર્મે શિરઃ પાતુ હ્રીં લલાટં સરસ્વતી ।
શ્રીં બાલા પાતુ મે નેત્રે ત્ર્ય શ્રં પાતુ શ્રુતી મમ ॥ ૧॥

રાં દુર્ગા પાતુ મે નાસાં ક્લીં મુખં પાતુ શારિકા ।
સૌઃ કણ્ઠં વૈખરી પાતુ ભં ભુજૌ પાતુ મે શિવા ॥ ૨॥

ગં હસ્તૌ પાતુ મે કાલી વં વક્ષસ્ત્રિપુરાઽવતુ ।
ષડશ્રં પાતુ મે મધ્યં વૃત્તં પાર્શ્વૌ મમાવતુ ॥ ૩॥

ત્યૈ પૃષ્ઠં પાતુ મે બ્રાહ્મી રાં નાભિં પાતુ વૈષ્ણવી ।
ફ્યૈ ગુદં પાતુ રુદ્રાણી હ્રીં કટિં મે પરાજિતા ॥ ૪॥

સ્વાં કૌમારી પાતુ જાનૂ હાં જઙ્ઘેઽવતુ ચણ્ડિકા ।
સ્વાહા ગુલ્ફૌ ચ વારાહી ૐ પાદૌ નારસિંહિકા ॥ ૫॥

વિસ્મારિતં ચ યત્સ્થાનં યત્સ્થાનં નામવર્જિતમ્ ।
તત્સર્વં પાતુ મે રાજ્ઞી મૂલવિદ્યામયી પરા ॥ ૬॥

વાસુકિઃ પૂર્વતઃ પાતુ નીલનાગોઽનલેઽવતુ ।
તક્ષકો દક્ષિણે પાતુ નૈરૃતે પદ્મનાયકઃ ॥ ૭॥

કાર્કોટકઃ પશ્ચિમેઽવ્યાદ્વાયવ્યાં શઙ્ખપાલકઃ ।
કુલિકશ્ચોત્તરે પાતુ શેષ ઈશાનમણ્ડલે ॥ ૮॥

બ્રાહ્મી બ્રાહ્મે મુહૂર્તેઽવ્યાદ્દિનાદૌ વૈષ્ણવી મમ ।
રુદ્રાણી પાતુ મધ્યાહ્ને સાયં પાત્વપરાજિતા ॥ ૯॥

નિશાદૌ પાતુ કૌમારી નિશીથે ચણ્ડિકાવતુ ।
નિશાન્તે પાતુ વારાહી સર્વદા નારસિંહિકા ॥ ૧૦॥

અસિતાઙ્ગઃ ક્ષિતેઃ પાતુ પયસો રુરુભૈરવઃ ।
ચણ્ડો માં પવનાત્પાતુ ક્રોધેશઃ પાતુ માઽનલાત્ ॥ ૧૧॥

ઉન્મત્તઃ સોમતઃ પાતુ ભીષણઃ સૂર્યતોઽવતુ ।
યાજકાચ્ચ કપાલેશો વ્યોમ્નઃ સંહારકોઽવતુ ॥ ૧૨॥

સદા સમન્તતઃ પાતુ વપુર્વસુદલં પાતુ મમ ।
ગુરવઃ પાન્તુ સર્વત્ર દિગીશઃ પાતુ સર્વતઃ ॥ ૧૩॥

વૃત્તત્રયં પાતુ નિત્યં ધરા ગેહં સદાઽવતુ ।

શ્રીચક્રં પાતુ ભીતિભ્યો યોગિન્યઃ પાન્તુ સર્વદા ॥ ૧૪॥

ઊર્ધ્વં ચાધઃ સદા પાતુ દિગ્ભ્યો રાજ્ઞીશ્વરઃ શિવઃ ।
સર્વત્ર સર્વદા સર્વં વપુર્ભૂતેશ્વરોઽવતાત્ ॥ ૧૫॥

પાદાદિમૂર્ધપર્યન્તં વપુઃ સર્વત્ર મેઽવતુ ।
શિરસઃ પાદપર્યન્તં રાજ્ઞી પઞ્ચદશાક્ષરી ॥ ૧૬॥

ઇત્યેવં કવચં રાજ્ઞ્યા મન્ત્રગર્ભં જયાવહમ્ ।
ત્રૈલોક્યવિજયં નામ દારિદ્ર્યભયનાશનમ્ ॥ ૧૭॥

સર્વરોગહરં સાક્ષાત્સિદ્દિં પાપનાશનમ્ ।
મહાભયહરં દેવિ મૂલવિદ્યામયં પરમ્ ॥ ૧૮॥

પરમાર્થપ્રદં નિત્યં ભોગમોક્ષૈકકારણમ્ ।
યઃ પઠેત્કવચં દેવિ રણે રાજભયે ક્ષણાત્ ॥ ૧૯॥

સઙ્ગ્રામેષુ રિપુઞ્જિત્વા વિજયી ગૃહમેષ્યતિ ।
પઠનાત્કવચસ્યાસ્ય રાજકોપઃ પ્રશામ્યતિ ॥ ૨૦॥

દ્યૂતે ધનં લભેદ્દ્યુતી શ્મશાને સિદ્ધિમાપ્નુયાત્ ।
ત્રિવારં યઃ પઠેદ્રાત્રૌ રેતઃસ્રાવે મહેશ્વરિ ॥ ૨૧॥

તસ્ય રાજ્ઞી મહાવિદ્યા સ્વપ્નેઽભીષ્ટપ્રદા ભવેત્ ।
સ્વયમ્ભૂકુસુમૈઃ શુદ્ધૈ રેતઃસ્તન્યોભયાઙ્કિતૈઃ ॥ ૨૨॥

રસૈર્ભૂર્જે લિખેદ્ધર્મ રવૌ પ્રાતર્મહેશ્વરિ ।
ચીરતન્તુભિરવ્યક્તં લાક્ષયા વેષ્ટિતં તથા ॥ ૨૩॥

સુવર્ણગુટિકાન્તઃસ્થં પૂજયેદ્યન્ત્રરાજવત્ ।
ગુટિકૈષા મહાવિદ્યા રાજ્ઞીમૂર્તિરિવાપરા ॥ ૨૪॥

મૂલવિદ્યામયી દેવિ કુક્ષિસ્થા ભોગદાયિની ।
પૃષ્ઠસ્થા બલદા દેવિ કુક્ષિસ્થા રોગનાશિની ॥ ૨૫॥

સર્વાર્થસાધની લોકે યથાભીષ્ટફલપ્રદા ।
ગુટિકેયં શુભા રાજ્ઞ્યા ન દેયા યસ્ય કસ્યચિત્ ॥ ૨૬॥

ઇદં કવચમીશાનિ મૂલવિદ્યામયં પરમ્ ।
સારસ્વતપ્રદં લક્ષ્મીપુત્રપૌત્રવિવર્ધનમ્ ॥ ૨૭॥

આયુષ્કરં પુષ્ટિકરં શ્રીકરં ચ યશસ્કરમ્ ।
ચતુઃષષ્ટ્યાદિતન્ત્રાણાં સારમાદાય વર્ણિતમ્ ॥ ૨૮॥

શ્મશાને યઃ પઠેત્સાયં મહાચીનક્રમેશ્વરઃ ।
સ સાધકો મહાદેવિ રાજ્ઞીપુત્રો ભવિષ્યતિ ॥ ૨૯॥

ઇદં તે મમ સર્વસ્વં ત્રૈલોક્યવિજયાભિધમ્ ।
કવચં મન્ત્રગર્ભં ચ ગોપનીયં સ્વયોનિવત્ ॥ ૩૦॥

ઇતિ શ્રીરુદ્રયામલે તન્ત્રે દશવિદ્યારહસ્યે શ્રીરાજ્ઞીકવચમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Rajni Kavacham*

pdf was typeset on September 29, 2019

Please send corrections to *sanskrit@cheerful.com*